# नाचिकेत–काव्यम् – सप्तमः सर्गः

**प्रो. हरिराम आचार्य,** अध्यक्षचर, संस्कृत विभाग, राजस्थान वि.वि., जयपुर

आसीच्छान्तः सुखदपवनो व्योम निःशब्दनादम्
जाताः स्तब्धाः प्रकृतिगतयो मुग्धतामाप सृष्टिः।
मृत्यु–र्वक्ता मरणभुवने जीवनं श्रोतृभूतम्
मन्दं मन्दं पिबति तृषितं स्मात्मतत्त्वामृतं नु ।।१।।

जीवन–मरण–नियन्ता
वक्त्यनुमरणात्मगते–र्विज्ञानम्।
श्रवणाञ्जलिपुट–पेयम्
पिबति च जीवः पिपासुसमः ।।२।।

आत्मज्ञान–विषयको
दिव्यो बभूवोपनिषदाकारः।
नचिकेतो–यमराज्ञोः
परमाद्भुतोऽयं सम्वादः ।।३।।

**नचिकेता :–**
भस्मीभूते शरीरे तु
चितानल–विसर्जिते।
कश्चाऽसौ याति यो देहात्
किमत्र परिशिष्यते? ।।४।।

**यम :–**

अस्थिस्तम्भ: शिराबद्धो
मेदो–मांस–विलेपित:।
चर्मावनद्ध–देहोऽयं
पञ्चभूत–विनिर्मित: ।।५।।

कालस्य कवलो भूत्वा
देहो विस्रंसते यदा।
जन्तोर्देहाद् बहिर्याति
जीवात्मा स निगद्यते।।६।।

भुक्तदेहं परित्यज्य
योनिमन्यां स गच्छति।
प्राप्नोति नूतनं देहं
यथाकर्म यथाश्रुतम्।।७।।

**नचिकेता:–**

आश्चर्यमिदं सौरे!
जडतनुरियं चेतनस्यावास:।
आत्मा नश्वरभवने
वसति कथमनश्वरो भूत्वा? ।।८।।

**यम:–**

नचिकेत: शृणु तत्त्वम्
आत्माऽयं वसति भौतिके देहे।
जडे निजाधिष्ठाने
यथा स्वगेहे गृहाधिपति:।।९।।

भौतिकमिदं शरीरम्
जननीगर्भाज्जातं मृतिं याति।
अविनश्वरोऽयमात्मा
नित्योऽमर्त्यो तथाऽजन्मा।।१०।।

ये हि जना मन्यन्ते
मरणोत्तरं ध्वंसते चात्माऽपि।
स्थूलदृष्टयश्चैते
सूक्ष्मात्मानं न विन्दन्ति।।११।।

श्रवणायाऽपि न लभ्य:
शृण्वन्तो न जानन्ति यं बहव:।
तस्यात्मन: सुविज्ञा:
विरला हि भवन्ति नचिकेत: !।।१२।।

सर्ववेदै: समाम्नातम्
तपोभिश्चाभिलक्षितम्।
ओमित्येकाक्षरं ब्रह्म
परमात्मेति कीर्तितम्।।१३।।

एतदेव परं सत्यं
एतदालम्बनं परम्।
अलिङ्गो निर्गुणाकारो
विधाता परमप्रभु:।।१४।।

**नचिकेता:–**

पश्च प्राणा हि जीवानां
देहं कुर्वन्ति सक्रियम्।
मर्त्यास्तैरेव लोकेऽस्मिन्
कथ्यन्ते प्राणिनो ध्रुवम्।।१५।।

**यम:–**

प्राणापानबलैर्मर्त्या
न जीवन्ति कदाचन।
इतरेण तु जीवन्ति
यस्मिन्नेतावुपाश्रितौ।।१६।।

सोऽयमात्मा हि मर्त्यस्य
हृद्गुहायामवस्थित:।
सुप्तेष्वेतेषु जागर्ति
तं नात्येतीह कश्चन।।१७।।

अणोरणुतर: सोऽयम्।
महतोऽपि महत्तर:।
देहस्थितोऽप्यदेहोऽसौ
मृत्युनाऽपि न हन्यते।।१८।।

शाश्वतश्चाद्वितीयोऽयम्
अमृत: सर्ववित् प्रभु:।
एकोऽप्यनेकरूपेषु
प्रविष्टस्तेषु भासते।।१९।।

**नचिकेता:–**

एको भूत्वा किमर्थं स:
नैकरूपेषु भासते।
अद्वितीय: कथं द्वैतं
भजते जीवयोनिषु ।।२०।।

**यम:–**

एकोऽहं स्यां बहुश्चेति
लीलाभावेन कामयन्।
ससर्जादाविदं विश्वं
मायाशक्त्या चराचरम्।।२१।।

तत् सृष्ट्वाऽनुप्रविष्टस्तत्
साक्षीभूतश्च तिष्ठति।
मायावच्छिन्न-जीवात्मा
तस्यैव प्रतिरूपक: ।।२२।।

जीवात्माऽल्पप्रकाशोऽय-
मात्मा पूर्ण-प्रकाशित:।
मायया तौ पृथग्भास्यौ
छायाऽऽतपसमौ स्थितौ।।२३।।

ऋतमेवं पिबन्तौ तौ
स्थितौ माया-विभाजितौ।
ब्रह्मज्ञा निगदन्त्येवं
नाचिकेताग्नि-साधका:।।२४।।

जीवात्मा कर्मभिर्बद्धो
भवचक्रे हि भ्राम्यति।
आत्मा मुक्तश्च तं बद्धं
साक्षिभावेन पश्यति।।२५।।

मायाजवनिका येन
ज्ञात्वा जीवेन वार्यते।
सोऽविद्यावरणं छित्त्वा
मुच्यते कर्मबन्धनैः।।२६।।

**नचिकेताः–**
अविद्यावरणं किं स्याद्
विद्या च कीदृशी मता?
आचरन्ति कथं देव!
लोकास्ताभ्यां प्रभाविताः?।।२७।।

**यमः–**
विद्येत्यविद्येति च ये प्रसिद्धे
ते स्तो विलोमे विपरीतसत्त्वे।
विद्याऽस्ति चक्षुः शुभमार्गदर्शकम्
अविद्यया याति नरो विमूढताम्।।२८।।

धीराः स्वयं पण्डितमानिदम्भिनो
जना अविद्याऽध्वनि विद्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा-
स्तेऽन्धा यथान्धेन हि नीयमानाः।।२९।।

गूढात्म-तत्त्वस्य पटूपदेष्टा
श्रोताऽपि चाश्चर्यतयाऽवलोक्यते।
ये साम्परायं न हि चिन्तयन्ति
ते मृत्युपाशे निपतन्ति मूढाः ।।३०।।

अध्यात्मयोगाधिगमेन धीरो
गुहाहितं गूढमनुप्रविष्टम्।
मत्वा च दुर्दर्श-पुराणदेवं
दुःखं सुखञ्च प्रजहाति सद्यः।।३१।।

विद्वन्मुखाद् यः खलु सूक्ष्मतत्त्वं
श्रुत्वा गृहीत्वा मनुते समाधौ।
स मोदते धाम परञ्च लब्ध्वा
ध्यात्वा च भूत्वा परमात्मरूपः।।३२।।

**नचिकेताः–**
मायाजवनिकां छित्त्वा,
छायारूपं विहाय च।
परमात्मा कथं ज्ञेय-
स्तमुपायं वद प्रभो।।३३।।

**यम :–**
जीवा यस्यौदनं सर्वे
मृत्युर्यस्योपसेचनम्।
असौ कः कीदृशः कुत्र
वक्तुमित्थं हि कः क्षमः?।।३४।।

सूर्यो तपति यद्भीत्या
वह्निर्ज्वलति यद्भयात्।
सुरासुरनराः सर्वे
येन कर्मसु योजिताः।।३५।।

न चर्मचक्षुषा प्रेक्ष्यो
नायं प्रत्यक्षगोचरः।
सर्वभूतान्तरात्मानं
को हि विज्ञातुमर्हति?।।३६।।

वर्णनीयः कथं शब्दैः
परमात्मा निराकृतिः।
तथापि रूपकेणाहं
देहिनं कथयामि तम्।।३७।।

आत्मा रथी तस्य रथं शरीरम्
बुद्धिः स्थिता सारथिरूपकेण।
वल्गा मनोऽश्वाः सकलेन्द्रियाणि
धावन्ति मार्गे विषयोन्मुखानि।।३८।।

आत्मेन्द्रियग्राम-मनोऽभियुक्तः
प्रोक्तः स भोक्तेति मनीषिवृन्दैः।
तैर्मुक्तरूपेण हृदि स्थितोऽसौ
कर्त्ता निगूढः स हि भूतसृष्टेः ।।३९।।

असावेव परा काष्ठा
पुरुषः सर्वतः परः।
सोपानानि च तं ज्ञातुं
सन्ति तेषामयं क्रमः ।।४०।।

इन्द्रियेभ्यः परा ह्यर्थाः
अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धि-
र्बुद्धेरात्मा महान् परः ।।४१।।

महतश्च परा माया
मायायाः पुरुषः परः।
पुरुषान्न परः किञ्चित्
पुरुषस्तु परा गतिः ।।४२।।

इन्द्रियार्थानुगा लोका
बहिः पश्यन्ति सर्वदा।
मृत्युपाशैश्च बध्यन्ते
मूढा आत्म-पराङ्मुखा।।४३।।

प्रग्रहो निग्रहे यस्य
स दक्षः बुद्धिसारथिः।
आत्माज्ञया निगृह्याश्वान्
सम्यक् चालयते रथम्।।४४।।

इन्द्रियाणि परावर्त्या-
ऽर्थेभ्योऽमृतपदेच्छुकः।
धीरः कोऽप्यन्तरात्मानं
रथिनं ज्ञातुमर्हति।।४५।।

**नचिकेता:–**

जन्मनो मृत्युपर्यन्तं
बाल्य–यौवन–वार्धके।
जीवो जीवति कै रूपै–
राश्रमसन्धिषु त्रिषु।।४६।।

**यम:–**

अजो ऋजुरमर्त्यात्मा,
पञ्च–तत्त्व–विनिर्मिते।
पुरे चैकादशद्वारे
शरीरे निवसत्यसौ।।४७।।

एतमाजीवनं ध्यायन्
आश्रम–सन्धिषु त्रिषु।
यजेद्यो नाचिकेताग्निं
जीव: शोकाद्विमुच्यते।।४८।।

जीवो जीवति देहेऽस्मिन्
चतुर्भी रूपक–क्रमै:।
असौ हंसो वसुर्होता
चतुर्थोऽतिथि–रूपक:।।४९।।

ब्रह्मचर्याश्रमे हंसो
गृहस्थस्याश्रमे वसु:।
वानप्रस्थाश्रमे होता
संन्यासे चातिथि: स्मृत: ।।५०।।

यथा जीवा भवन्त्यब्जा
भूमिजा ऋतजास्तथा।
अद्रिजाश्च क्रमेणोच्चै–
स्तथा जीवस्थिते: क्रम: ।।५१।।

प्रथम: शुचिषत्प्रोक्त–
श्चान्तरिक्षस्थितोऽपर:।
तृतीयो वेदिसच्चोक्त–
श्चतुर्थश्च दुरोणसत्।।५२।।

आद्याश्रमे नृदेहोऽयं
वरदेहस्तदन्तरे।
तृतीये ऋतदेहोऽसौ
व्योमदेहश्चतुर्थके।।५३।।

पुण्यात्मा प्रथमे प्रोक्तो
ज्ञानात्मा च द्वितीयके।
तृतीये स महानात्मा
शान्तात्मा च तुरीयके।।५४।।

आत्मन्यस्मिन् प्रदीप्यन्ते
नाचिकेताग्नयस्त्रय:।
एवं क्रमेण जीवात्मा
ब्रह्मयज्ञं जुहोत्यसौ।।५५।।

इमं यो हि विजानाति
शान्तात्मानं समीपत:।
त्यक्त्वा शोकं जुगुप्सां स
लभते शाश्वतं सुखम्।।५६।।

नयत्यूर्ध्वमसौ प्राण-
मपानञ्च क्षिपत्यधः।
वामनो मध्य आसीनो
वर्तयते बृहद् ऋतम्।।५७।।

**नचिकेता:-**

असौ शब्दैरनिर्वाच्यः
निराकारो गुहास्थितः।
अनुभूतौ कथं देव!
कस्य भासा प्रकाश्यते?।।५८।।

**यम:-**

यत्रास्ति पूर्णः स्वप्रकाशपुञ्जितः
स सूर्यकोटिप्रभ-वह्नि-रूपकः।
न भासते तत्र रविर्न विद्युतः
सोमो न, तं भासयितुं हि कः क्षमः?।।५९।।

स भासते निश्छल-शुद्धमानसे
विद्योतते निर्मल-बुद्धि-दर्पणे।
स ज्योतिषा केन बत प्रकाशितः
यस्यैव भासा भुवनं विभात्यसौ।।६०।।

**नचिकेता:-**

अभिप्रायो मया ज्ञातः,
कृतान्त! कथनस्य ते।
तथाप्याभासितः सोऽय-
मिति ज्ञेयं कथं प्रभो?।।६१।।

**यम:-**

यथा ललाटे तिलकं विराजते
हृदि स्थितोऽङ्गुष्ठमितस्तथा विभुः।
अधूमक-ज्योतिरिव प्रकाशते
सनातनो भूत-भविष्य-शासकः ।।६२।।

आज्ञा-सहस्रारक-चक्रमध्ये
विरच्यतेऽङ्गुष्ठमितो ललाटे।
तिलाकृतिर्दीपशिखेव दीप्तः
स आत्मनो भौतिक-बिम्बरूपः।।६३।।

अनुभूय परं ज्योति-
श्छित्त्वा यो कर्मबन्धनम्।
सम्प्राप्नोत्यात्मनाऽऽत्मानं
जीवन्मुक्तः स कथ्यते ।।६४।।

**नचिकेता :-**

एवं ज्योतिः स्वरूपोऽयं,
ज्ञातः परमपूरुषः।
अगोचरो निराकारः
कथं लभ्यो नृजीवने?।।६५।।

**यम:-**

न शास्त्रवाचा न कथाप्रसङ्गै-
रात्मा न लभ्यस्तपसा न यज्ञैः।
स्वयं वृणोत्येष हि यं स धन्य-
स्तस्मै तनूं स्वां प्रकटीकरोति।।६६।।

सोऽस्तीति प्रत्ययग्राह्यो
मननीय: शुचौ हृदि।
तत्त्वभावेन ध्यातव्य
आस्तिके स प्रसीदति।।६७।।

अध: शाखोऽयमश्वत्थ:-
ऊर्ध्वमूलोऽद्भुतो तरु:।
लोकास्तस्मिँश्छ्रिता: सर्वे
अव्यये च सनातने ।।६८।।

तस्यानुग्रहाज्जीवो
यस्तं ज्ञातुं प्रवर्तते।
जायते पूर्णनिष्काम:
सोऽमृतत्वाय कल्पते।।६९।।

भोगादविरतोऽशान्त:
संशयी चासमाहित:।
प्रज्ञानेनाऽपि तं ह्येते
लभन्ते न चतुर्विधा:।।७०।।

तल्लब्धिवीथी ह्यतिदुर्गमा यथा
क्षुरस्य धारा निशिता दुरत्यया।
करोति योऽत्यन्त-कठोर साधनां
स एव भूयादिह मुक्तबन्धन:।।७१।।

हृदये च शतं नाड्य:
हेतुर्जीवस्य जन्मन:।
तद्भिन्ना मूर्धगा नाडी
मोक्षं प्रापयते नरम्।।७२।।

हृद्ग्रन्थिर्भिद्यते तस्य
यस्तं पश्यति सन्ततम्।
अमृतो जायते मर्त्य:
शरीरेऽपि सति स्वत:।।७३।।

अन्यथाऽनेक-कल्पेभ्यो
विवशोऽनन्तयोनिषु।
यन्त्रारूढसमो याति
भ्राम्यमाण: स मायया।।७४।।

उत्तिष्ठ वत्स! त्यज मोहनिद्रां
प्राप्तो वर: साधय तं स्वदेहे।
ज्ञातं रहस्यं त्वयका हि मृत्यो-
रनावृता द्वास्तव मोक्षधाम्न: ।।७५।।

बद्धकरो नचिकेता
ननाम कृतान्तं ऋणीव शीर्षेण।
उवाच गद्गदवचसा-
कृतकृत्योऽहं भवत्कृपया।।७६।।

दीपशिखा प्रज्वलिता
तमसावृते मे चेतनाकोष्ठे।
धन्योऽस्म्यहैतुकोऽय-
मनुग्रहो मयि कृतो भवता।।७७।।

जीवनदातर्मृत्यो!
कीदृग् दण्डविधानं विहितं ते?
विज्ञापय भूयो मां
कुत: किमर्थं हि यमलोक:?।।७८।।

तस्य तद्वचनं श्रुत्वा
स्मयमानमुखो यमः।
जिज्ञासां शमयंस्तस्य
जगाद वटुकं पुनः ।।७९।।

**यमः-**

वत्स! प्रिय! शृणु संक्षिप्तं यमलोक-विधानम्।
अत्रत्यं मृत-जीव-कर्मणां दण्ड-निदानम्।।८०।।

यथा दिनं उदयादस्तं यावद् रवि-यात्रा।
यथा निशा चास्तादुदयं यावद् रवि-यात्रा।।८१।।

तथा जन्मनो मरणं यावज्जीवन-यात्रा।
मरणात्पुनर्जन्म-पर्यन्तमदर्शन-यात्रा।। ८२।।

जननी-जठराज्जातानां हि निश्चितं निधनम्।
तथैव मृतजीवानां पुनर्निश्चितं भवनम्।। ८३।।

यमसदनं सूर्यस्य यथा पश्चिम दिक-श्रयणम्
यत्र जन्म-मरणयोर्भवति भवचक्रे मिलनम्।।८४।।

प्राचीदिशा यथा हि दिनमणेरुदयस्थानम्।
पुनर्जन्मने तथैव जननी-जठर-विधानम्।।८५।।

यमलोकोऽयं क्षण-विश्रान्ति-श्चैतन्यस्य।
अत्र शरीरान्तर-संक्रांति-श्चैतन्यस्य।। ८६।।

अथवा भवति पुनर्भव-मुक्ति-श्चैतन्यस्य।
विहित-कर्मणां फलसम्प्राप्ति-श्चैतन्यस्य।।८७।।

पुनर्जन्म-मोक्षयोरत्र मार्गौ द्वौ भवतः।
एको नरकञ्चैको दिव्यं स्वर्गं व्रजतः ।।८८।।

पुनर्जन्म कर्मानुसारतः इति यम-नियमः।
मोक्षाप्ति-र्धर्मानुसारतः इति यम-नियमः।।८९।।

चेतन आत्मा देहं त्यक्त्वा प्रविशत्यत्र।
तस्य भावि-मार्गस्य निर्णयः प्रभवत्यत्र।। ९०।।

पुण्यविहीनानां विधीयते योनिपातनम्।
विदधति पुण्यात्मनोऽत्र मुक्ताः स्वर्गरोहणम्।।९१।।

यमलोकं न सदेहः कोऽपि प्रवेष्टुं शक्तः।
त्वं शप्तोऽपि मन्त्रशक्त्या सशरीर आगतः।।९२।।

शेषो यद्यपि नरवपुषा तव कर्मविपाकः।
अतो न मरणं दातुं तेऽहं क्षमो वराकः।। ९३।।

धन्यो नचिकेतस्त्वं ब्रह्मपरो हृदि शुद्धः।
त्वया हठेन कारितोऽहं वचन-त्रय-बद्धः।।९४।।

साक्षान्मृत्युमुखादाहृत-मुत्तरं प्रशस्यम्।
ज्ञातं त्वयाऽऽत्मनः मरणोत्तर-गूढ-रहस्यम्।।९५।।

निर्लिप्तोऽपि कर्मणा कं कं मार्गं श्रयते?
कुत्र कुत्र बत देही देहं त्यक्त्वा रमते?।।९६।।

आत्मानं विद्धीति तत्त्वतो ममोपदेशः।
अत एषोपनिषच्च सारभूतश्चादेशः।।९७।।

त्वमस्य नचिकेत:! त्वं प्रथम: श्रोता संसारे।
बाल-वयस्यपि प्रौढ-तत्त्ववेत्ता संसारे।।९८।।

त्वया श्रद्धया लब्धं गूढं दिव्यं ज्ञानम्।
मरणोत्तरश्चात्मनो यात्राया विज्ञानम्।।९९।।

विद्याभीप्सु-र्जिज्ञासूना-मुच्चादर्श:।
त्वं सुपात्रशिष्य:-इति मम दृढतम-निष्कर्ष: ।।१००।।

नचिकेतस्त्वं जीव शतं शरदश्चात्मस्थ:।
जीवन्मुक्तो भूया: मनसा वपुषा स्वस्थ:।।१०१।।

इतो गच्छ पितुरुटजं यमलोकात् सशरीर:।
इदमाश्चर्यं पश्येज्जनकस्ते श्रुतिधीर:।। १०२।।

नन्देतां ते पितरौ दृष्ट्वा निजसन्तानम्।
भूयात्ते मङ्गलं सकल-जगत: कल्याणम्।।१०३।।

इत्युक्त्वा यमराज:
सम्प्रेष्य नचिकेतसं निजाश्रमम्।
ध्यायन्नद्भुत-घटितं
सद्य: प्रविष्टो निजसदनम्।।१०४।।

दिव्यालोक: प्रसृत:
क्षणेन विद्युन्निभ: सकलभुवने।
मन्त्रबलेनानीत:
स्वजनकाश्रमे च नचिकेता:।। १०५।।

चरमशोकभृते तमसावृते
प्रकटितो वटुक: पितुराश्रमे।
घन-घटावरणावृतपूर्वत:
समुदितोऽरुण-बालरविर्यथा ।।१०६।।

सकुशलस्तनय: पुनरागत:
यमगृहाद् भुवि जीवित इत्यहो!
प्रमुदिता: सकलाश्च चराचरा:
अभवदुत्सव आर्ष-तपोवने ।।१०७।।

समायातं दृष्ट्वा यमसदनतस्तं कुशलिनम्
पिता माता मित्राण्यपि वनचरास्तापसजना:।
परानन्दं प्रापु-र्जितभुवनयज्ञश्च फलित:
कथं वर्ण्या शब्दैरमृतफलदा दिव्य-घटना।। १०८।।

श्रुत्वा यमोपदिष्टं
विज्ञायाध्यात्मयोग-विज्ञानम्।
नचिकेता निर्विकृति:
ब्रह्मप्राप्तोऽमृतो जात: ।।१०९।।

एवं य: कोऽप्यन्यो
नचिकेता इव तत्त्वमिदं मनुते।
मृतिरहितो निष्काम:
स ब्रह्मत्वं सदा भजते।।११०।।

ॐ मर्त्ये लोके शान्ति-
र्भूयाच्छान्तिर्मरणोत्तरे लोके।
शान्तिश्च भूर्भुव: स्व:
शान्ति: शान्ति: शान्ति-र्बोभूयात्।। १११।।